तत्त्वान्तराणि प्राणादुवागादीन्द्रियाणीति” शाङ्करभा०। अतएव वेदान्तसारादौ आकाशादिपञ्चतन्मात्राणां समस्तानां रजोऽंशेभ्यः पञ्चवृत्तिकप्राणस्योत्पत्तिमङ्गीचकार तेनापि इन्द्रियेभ्यस्तस्य पृथक्त्वं गम्यते। १५देहस्थे दशवृत्तिके वायुभेदे प्राणकर्मन्शब्दे दृश्यम्। १६ धातुः पुत्रभेदे पु० “भार्य्ये धातविधातोस्ते तयोर्जातौ सुता बुभौ। प्राणश्चैव मृकण्डुश्च”मार्क०५२अ०। वैवस्वतमन्वन्तरे १७सप्तर्षिभेदे पु० हरिवं० ७अ०। धराख्यवसोः १८पुत्रभेदे पु०हरिवं०६अ०। १९विष्णौ पु०“ईशानः प्राणदः प्राणः” विष्णुस०। ‘प्राणस्य प्राणः’ इति श्रुतेस्तस्य तथात्वम्। प्राणयति प्राणः “अच्युतः प्रथितः प्राणः” विष्णुस०। “सूत्रात्मना प्राणयतिचेष्टयति प्रजाः प्राणः” भा० व्युत्पत्तिद्वययोगात् नामद्वयम्।

प्राणस्य जलेनैवोपचयस्य करणात् जलमयत्वम् यथोक्तं छा० उ० “आपः पीतास्त्रेधा विधीयन्ते तासां यःस्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः सः प्राणः” इत्युक्त्वा “अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वाक्” इति च संक्षिप्योक्त्वा तत्समर्थितं यथा “यथा दध्नः सौम्य! मथ्यमानस्य योऽणिमा अर्द्ध्वः समुदीषति तत्सर्पिर्भवति” इतिदृष्टान्तीकृत्य “एवमेव खलु अपां सौम्य! पीयमानानां योऽणिमा स अर्द्ध्वः समुदीषति स प्राणो भवतीति” छा०उ०।“यथायं दृष्टान्तः एवमेव खलु सौम्यान्नादेरस्य भुज्यमानस्यौदर्य्येणाग्निना वायुसहितेन खजेनेव मथ्यमानस्य योऽणिमा स अर्द्ध्वः समुदीषति तन्मनो भवति मनोऽवयवैः सह संभूय उपचिनोति तद्वत् तथाऽपां सौम्य! पीयमानानां योऽणिमा स प्राण इत्यादि” भाष्यम्। २०मूलाधारस्थे वायौ च “मूलाधारोद्गतः प्राणः” आ०ति०। [इन्]। स्वार्थे क। २बोले च मेदि०।

**प्राणक** पु० प्राणेन कायति कै—क। १जीवमात्रे २जीवक-

**प्राणकर** त्रि० प्राणं बलं करोति कृ—ट। बलकारके “सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्। घृतमुष्णोदकं चैव सद्यः प्राणकराणि षट्” चाणक्यः।

**प्राणकर्मन्** न० ६त०। प्राणानां दशानां कर्मभेदे तानि च कर्माणि “सर्वाणीन्द्रियकर्माणि, प्राणकर्माणि चापरे” गीता भाष्य टी० आनन्दगिरिणोक्तानि यथा “प्राणानाञ्च दशानां कर्माणि, प्राणस्य बहिर्गमनम् अपानस्याधोगमनं व्यानस्य व्यायामाकुञ्चनप्रसरणादीनि समानस्याशितपीतादीनां समुन्नयनं उदानस्योर्द्ध्वनयनम् “उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतस्यापि सर्वव्यापी धनञ्जयः” इत्येवं रूपाणि।

**प्राणग्रह** पु० “प्राणो वै ग्रहः” तैत्ति० उक्ते प्राणाख्ये इन्द्रिये ग्रहशब्दे २७४६ पृ० दृश्यम्। तत्र प्राणशब्देन घ्राणमुच्यते इति भाष्ये समर्थितम्।

**प्राणजीवन** त्रि०प्राणं जीवयति जीवि—ल्यु। १प्राणस्थापके २प्राणपोषके विष्णौ पु०“प्राणभृत्प्राणजीवनः” विष्णुस० “प्राणयति प्राणिनो जीवान् जीवयति प्राणजीवनः “न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ” मन्त्रवर्णात्” भा०।

**प्राणतज** पु० कल्पभवे वैमानिकभेदे हेमच०। प्राणयज इत्येव साधुःपाठः। [क्वल०।

**प्राणथ** पु० प्र+अन—अथ। १प्राणशब्दार्थे २बलवति च उ-

**प्राणद** न० प्राणं प्राणनं बलं वा ददाति पुष्णाति द्यति वा दा दो—वा—क। १जले तस्य यथा प्राणोपकारकत्वं तथा प्राणशब्दे छा०उ०वाक्ये दर्शितम्। २रक्ते च हेमच०। ३जीवकवृक्षे पु० राजनि० ४हरीतक्याम् ५ऋद्धिवृक्षे च स्त्री राजनि०। ६प्राणदातृमात्रे त्रि० “किमाचर्य्यं क्षारदेशे प्राणदा यमदूतिका” तन्त्रटः। ७विष्णौ पु० तस्य प्रलये सर्वप्राणच्छेदकत्वात्तद्दातृत्वमिति नामद्वयम् प्राणशब्दे उदा० दृश्यम्।

**प्राणदा** स्त्री चक्रदत्तोक्ते गुटिकाभेदे “सनागराल्कनरद्विदारकं गुडेन या मोदकमत्युदारकम्। अशेषदुर्नामकरोगदारकं करोति वृद्धं सहसैव दारकम्। चूर्णे चूर्णसमो ज्ञेयो मोदके द्विगुणो गुडः। त्रिपलं शृङ्गवेरस्य चतुष्कं मरिचस्य च। पिप्पल्याः कुडवार्द्धञ्च चव्यायाः पलमेव च। तालीशपत्रस्य पलं पलार्द्धं केसरस्य च। द्वे पले पिप्पलीमूलादर्द्धकर्षञ्च पत्रकात्। सूक्ष्मैलाकर्षमेकन्तु कर्षं त्वचमृणालयोः। गुडात् पलानि तु त्रिंशच्चूर्णमेकत्र कारयेत्। अत्रप्राणाख्या गुडिका प्राणदेति च सा स्मृता”। [ल्युट्। २जले पु० शब्दच०।

**प्राणन** न० प्र+अन—भावे ल्युट्। १जीवने जटा०। करणे

**प्राणनाथ** पु० ६त०। पत्यौ शब्दरत्ना०। प्राणपत्यादयोऽप्यत्र

**प्राणनिग्रह** पु०प्राणो निगृह्यतेऽनेन नि+ग्रह—करणे अप्। प्राणायामे प्राणनिरोधादयोऽप्यत्र।

**प्राणन्त** पु० प्र+अन—करणे झ। १वायौ उज्ज्वल० २रसा-